# *अरण्यपर्व – धर्मजस्य पात्रचित्रणम्*

**Author:** - Dr M B S S Narayana

Assistant Professor in Sanskrit

Sri Satya Sai Institute of Higher Learning,(SSSIHL)

***मुख्योद्देशः/व्यास सङ्ग्रहः*** – नाम्ना एतत् वनपर्व एव किन्तु पाण्डवबलवर्धनकरपर्व इति निश्चप्रचम् वक्तुं शक्यते। दैवबलं, ब्राह्मणबलं, श्रीकृष्णस्यानुग्रहं, शस्त्रास्त्रसंपादनम् इत्यादि अनेकादि विषयेषु वनपर्व नवपर्व/ नवविषयपर्वरूपेण वक्तुं शक्यते। सभापर्वान्ते एव राज्यभ्रष्टाः पाण्डुपुत्राः द्रौपदी सहिताः अरण्ये प्रविष्टाः। अतः अरण्य पर्व पठनश्रवणेन कष्टाः भविष्यन्ति इति सन्देहः न करणीयः। अपि च अरण्ये धर्ममेव आश्रित्य दुर्गादिव्यानुग्रहमपि प्राप्तवन्ताः कौन्तेयाः।

"वयं सर्वे योद्धारः, अनुज्ञां ददातु, धार्तराष्ट्रान् हनिष्यामः"- इत्यादि वचनैः भीमार्जुनौ, "भवान् धर्मं रक्षितवान्, किन्तु धर्मेण भवान् वञ्चितवान्" इत्यादि वचनैः द्रौपदी , धर्मजस्य मनः परिवर्तयितुं प्रयतितवन्तः। अस्मिन् सन्दर्भे दूरदर्शी धर्मजः वृद्धप्रियसोदरौ भीमार्जुनौ सान्त्वयन् भीष्मद्रोणयोः शस्त्रास्त्रमहत्वं प्रतिबोध्य शत्रुवर्गे तादृशान् जेतुं शस्त्रास्त्रबलवृद्धिं साधितुं वनवाससमयः अस्माकम् अनुकूलः इति प्रतिबोधयति।

**अक्षयपात्रम्** – वनप्रस्थानारम्भे अनुगंतृन् पौरान्, तत्रापि च अनेकान् ब्राह्मणान् उद्धिश्य, मनसि क्षुभितः धर्मजः तान् स्वस्वगृहप्रेषण विषये बहु प्रयतते स्म। तस्य प्रयत्नेन कतिचन पौराः एव निजपुरोन्मुखाः आसन्। कतिचन अन्ये धर्मजम्/ पाण्डवान् नैव पीडयामः इति स्वयमेव आहारादिकं कल्पयामः इति अनुगमनम् अनुगृह्णन्तु इति धर्मजम् प्रार्थयामासुः। तेषां वचनानि तं धर्मात्मानं अतीव विकलमनस्कं अकुर्वन्। तादृशं तं शौनकवंशजः कश्चन विप्रः "शोकस्थान सहस्राणि भयस्थान शतानि च.." इत्यादि हितवचनैः सान्त्वयामास। पुनः तं धीरमकार्षीत् स विप्रः।

ब्राह्मणाराधनविषये पौरप्रियकरणविषये दीनं राजानं पुरो हितकारी पुरोहितः धौम्यः सूर्याराधनेन समस्यायाः तव परिष्कारो लभ्यते इति मार्गोपदेशकोऽभूत्। अत्र धौम्यौक्तं सूर्यस्य अन्नप्रदैनसामर्थ्यं सर्वैः अविस्मरणीयं भवतु

एवं भानुमयं ह्यन्नं भूतानां प्राणधारणम्।

पितेव सर्वभूतानां तस्मात् तं शरणं व्रज।। 3.9

अरण्यप्रस्थानम् रामायणे महाभारते च यद्यपि सदृशं दृश्यते तथापि तन्निवर्तन विषये रामानुसृतः पन्थाः भिन्नः। जनानुसरणेन अयोध्या निर्जनी भवेत् इति, तां भरतः कथं पालयति इति- कैकेयीभावं हृद्गतं मनसि सम्भाव्य श्रीरामः तदिच्छारूपं निर्जनारण्यसञ्चारं मनसि कृत्वा अनिष्टोऽपि तान् प्रेषयामास।

अत्र भारते तु न तथा। पाण्डवप्रियाणाम् अनुसरणं, धार्मिकानाम् अनुसरणम्, तन्निवारणेच्छा धार्तराष्ट्रेषु नोत्पन्ना। तथा आगतानाम् पौराणाम् विषये धर्मजः यथाशक्ति रक्षणोपायं कर्तुम् अभिलाषी बभूव। सम्पदानापगमेऽपि प्रजारक्षणरूपः क्षत्रियधर्मः धर्मजं सूर्याराधन विषये प्रेरकः अभूत्।

सूर्यानुग्रहं प्रपद्य तदनुग्रहेण अक्षयं पात्रं सम्पाद्य आर्तानाम् अन्नदानसमर्थो बभूव धर्मजः। आराधन प्रीतः भगवान् सूर्यः प्रतिदिनं तत्पात्रमहिम्ना पाण्डवकृत भोजनदानस्य उपकारो अभूत्। एवमेव अरण्यवासवर्षेषु द्वादशसु पाण्डवानां पात्रमिदम् उपकरोतीति सूर्यवचनम् अत्र अविस्मर्तव्यम् विज्ञैः।

निजकिरणैः भूमितः जलं प्रपीय तत्सर्वं पुनः वर्षरूपेण तेषामेव जलं प्रदाय सस्यकारकः रविः तेषां भोजन प्रदानविषये सर्वदा उपकारक एव। वाल्मीकि वचनमपि अत्र विमर्शकसहायकं भवतु।

"नवमास धृतं गर्भं भास्करस्य गभस्तिभिः।

पीत्वारसं समुद्रस्य द्यौः प्रसूते रसायनम्।। " (वर्षर्तुवर्णनम् – किष्किन्धकाण्ड)

सूर्यप्रसादितस्य अक्षयपात्रस्य महत्वपरीक्षणार्थं धार्तराष्ट्रप्रेरितः दुर्वासाः यदा पाण्डवावासम् आगच्छत् तदा प्राप्तं धर्मसङ्कटं (द्रौपदी भोजनात् परं अक्षयपात्रम् नैवआहारम् ददातीति) भगवान् वासुदेवः अतिनिपुणम् परिश्चकार। तस्मात् अक्षयपात्रप्रादतुः सूर्यस्य आशयम् अन्तिकस्थितेन श्रीकृष्णेन अपि समन्वितं सत् पाण्डवानां दैवबलं निश्चप्रचम् करोति। कौरवकृत कपटप्रयत्नम् एवं वितधम् आशीत्। एतदपि धर्जजस्य धर्ममार्गविजयसूचकम् भवेत्।

वनवासव्यधिता द्रौपदी, शान्तचित्तं धर्मजं उपेत्य एकदा साऽन्तरङ्गम् आविष्करोति। राजसूयादि यागकर्ता त्वम् एवं वन्यं जीवितम् अनुभवन् मम चक्षुभ्याम् बाधको भवसि। महापराक्रमशालिनौ भीमार्जुनौ भवदाज्ञाम् अनुर्लङ्घयन्तौ एवं कन्दमूलफलाशनं यद्वर्तेते तन्मे हृद् दहति। तान् वीक्ष्य, तथैव वीरपत्नीं पतिव्रतां दुर्जनावमानिताम् मां च वीक्ष्य भवान् क्षमाशीलः एवं कथं स्थितः? तेजः क्षमा च प्रभुभिः तत्तत् कालनुसारमेव आश्रयणीयौ। यदा राजा धर्मम् रक्षति तदा एव तम् धर्मः रक्षति। "धर्मो रक्षति रक्षितः" इति शास्त्रवचनम् किम् न भवान् जानाति? धार्मिकः सन् भवान् सर्वान् आत्मीयान् कष्टसागरे कष्टपरम्परायाम् निमज्जयसि, अधार्मिकः धार्तराष्ट्रः स्वजनैः सुखपरम्पराम् अनुभवति- इति उपालम्भवचनैः धर्मजं कर्तव्योन्मुखं कर्तुं प्रयतते स्म।

याज्ञसेन्याः कृतं निपुणम् उपालम्भनं धर्मजः निशम्यापि शान्तचित्तः युधिष्ठिरः एवम् अवोचत्। द्रौपदि! भवद्वचनेषु नास्तिकप्रतिपादनम् यवनिकाच्छादितं दृश्यते। मनसा वाचा कर्मणा आचरितव्यो धर्मः। तादृश धर्माचरणे फलाकांक्षा नैव वर्तितव्या। फलाकांक्षा वर्तते चेत् वयं धर्मवाणिज्यकाः भवेमः, तादृशस्थितिः धर्मवादिनां जघन्या(निन्द्या)- इति वदन्

क्षमा धर्मः, क्षमा यज्ञः, क्षमा वेदाः, क्षमा श्रुतम्।

य एतदेवं जानाति स सर्वं क्षन्तुमर्हति।। 29.36

इत्यादि वचनैः स्वप्रवर्तनं समर्थयति, मदाश्रितं सहनमेव सदाचारपरैः अनुमोदितः इति धर्मजः तां शान्तचित्तां चकार। अत्रैव भीमार्रजुनादीनां वचनान्यपि धर्मजः धर्मयुक्तं समाधत्तवान्।

एतत्सर्वं वनवासजीवनस्य पाण्डवशिबिरे सञ्जातं वार्षिकपर्यालोचनम् इति वक्तुं शक्यते।

**वनपर्वणि धर्मजसम्पादितं प्रतिस्मृति – अनुस्मृति विद्याद्वयम्**

दूरदर्शी धर्मजः वृद्धप्रियसोदरौ भीमार्जुनौ सान्त्वयन् भीष्मद्रोणयोः शस्त्रास्त्रमहत्वं प्रतिबोध्य शत्रुवर्गे तादृशान् जेतुं शस्त्रास्त्रबलवृद्धिं साधितुं वनवाससमयः अस्माकम् अनुकूलः इति प्रतिबोधयति।

तदनन्तरे पाण्डवान् द्रष्टुम् आगतः व्यासः धर्मजस्य हृद्गतं सङ्कल्पम् अभिनन्द्य तस्मै प्रतिस्मृति नामिकां विशिष्टां विद्याम् उपदिदेश। तां विद्याम् अर्जुनेन इन्द्रादीनाम् अनुग्रहे एव सम्पादयितव्य इति (वृत्रासुरवध सन्दर्भे सर्वे देवाः स्वीय प्रभावान्वितं अस्त्रमन्त्ररूपेण इन्द्रायत्तं चक्रुः।

इन्द्रे ह्यस्त्राणि दिव्यानि समस्तानि धनंजय।

वृत्राद् भीतैर्बलं देवैस्तदा शक्रेः समर्पितम्।। 37.14

तन्महास्त्रसम्पदर्थम्, अपि च पाशुपतास्त्रादि महास्त्रसाधनार्थम् अर्जुनं प्रेषितुं व्यासः धर्मजे उपदिदेश। तद् सन्दर्भे हिमवते तपसा शर्वमाराधितुम् अर्जुनेन गन्तव्यमिति व्यासोपदेशं मनसि कृत्वा धर्मजः प्रतिस्मृतिविद्यां जापंजापं सिद्धिं प्राप्य तां विद्याम् अर्जुनाय प्रदत्तवान्। (एष विद्योपदेशः रामायणे विश्वामित्रकृतरामोपदेशं, रामेण कृत लक्ष्मणोपदेशं च स्मारयति। विद्याप्रदाने सम्प्रदायपरम्परा एवं वर्तते।) तन्मन्त्र बलेनैव अर्जुनः एकाह्ने हिमवन्तं प्राप।

**अनुस्मृति** – अरण्यपर्वणि धर्मजः लोमशमहर्षिं मिलितवान्। (तयोः सम्मेलनात् पूर्वं लोमशस्य माहात्म्यं जीवनवैशिष्ट्यं, तत् पूर्वचरित्रं च भगवता व्यासेन सविवरं प्रस्तुतम्।) "धर्मजेन तीर्थयात्रादिकं कारयन् भवान् तमनुसर" – इति इन्द्रप्रार्थनम् अनुसृत्य/अङ्गीकृत्य लोमशः काम्यकवने धर्मजं मिलित्वा ताम्स्तान्

आलापान् प्रसङ्गाश्च कुर्वन् सन्दर्भानुसारं तस्मै अनुस्मृति नामकविद्याम् उपदिदेश। एतत् प्रस्तावनं वस्तुतः अरण्यपर्वणि नास्ति। किन्तु स्त्रीपर्वणि धर्मज एव "वनवाससमये लोमशः मह्यम् इमाम् अनुस्मृतिविद्याम् उपदिदेश, तन्महिम्ना अहमेवंविधं ज्ञानं सम्पादितवानस्मि इति धृतराष्ट्रसविधे प्रोवाच।

एतद्विद्याप्रभावेण धर्मजः मानवातीतदृष्टिं सम्पाद्य सर्वामपि भाविकथां, भारतयुद्धदिनानि, तत्र के के योद्धाः कैः कैः निहता भवेयुः इति सर्वं पूर्वमेव ज्ञातवान्। युद्धे शल्यसारथ्यमपि तेन युद्धारम्भे एव विज्ञाय मातुलं शल्यं युद्धात् पूर्वमेव समभाषि।

स्त्रीपर्वणि युद्धे निहताः के के योद्धाः, तेषां परलोकगमनं, पुण्यपापफलप्राप्तिं, कथं समापुः इति तूष्णीं धृतराष्ट्रेण पृष्टो धर्मजः विचित्रं प्रसङ्गम् अकरोत्। तत्र धर्मजप्रसङ्गसारांशः एवमस्ति। महाभारतयुद्धे उभयपक्षेषु निहताः राजानः सैनिकाश्च (166020000) षट् षष्ट्यधिकशतकोट्यः, ततोपि विंशतिसहस्राः मृताः।

दशायुतानामयुतं सहस्राणि च विंशतिः

कोट्यः षष्टिश्चषट् चैव ह्यस्मिन् राजन् मृधे हताः ।। 26.9(स्त्री पर्वम्)

इति तत्र तत् पुण्यलोकगमनादिकं प्रति च, धर्मजः सविवरं पितृव्यं प्राह। धर्मजस्य तत् विज्ञानं धृतराष्ट्रस्य आश्चर्यापादकम् अभूत्। विश्मितः सः, कथम् एतत् सर्वं भवता विज्ञातमिति धर्मजं पप्रच्छ। तदा सः अरण्यवासवेलायां लोमशोपदिष्ट 'अनुस्मृतिविद्या' प्रभावेण मया एतत्सर्वं ज्ञानचक्षुषा दृश्यते (कतिचन योधाः युद्धात् पलायितां वा इत्यादिकं तु मया ज्ञातुं न शक्यते इति धर्मजेन तदा विवरणं दत्तम्।

देवर्षिर्लोमशो दृष्टस्ततः प्राप्तोऽस्म्यनुस्मृतिम्।

दिव्यं चक्षुरपि प्राप्तं ज्ञानयोगेन वै पुरा।। 26.20 (स्त्री.प)

इति स्त्रीपर्ववचनम् अरण्यपर्वोपदिष्टाम् अनुस्मृतिम् निरूपयति। प्रतिस्मृति- अनुस्मृति विद्याद्वयेन धर्मजः युद्धविजयपारदृश्वाप्रथममेवासीत् इति विज्ञानाम् आश्चर्यकरो विषयः।

पञ्चपाण्डव सामूहिक मूर्तौ धर्मजः मुखस्थानीयः, भीमसेनः भुजस्थानीयः, अर्जुनः हृदयस्थानीयः यमो पादस्थानीयौ इति सामूहिकपाण्डवरूपम् अवगच्छन्तु विज्ञाः। ज्ञानोपार्जनम्, अवसरे एव तत् विज्ञानस्य विनियोजनम्, तन्महाशयस्य गाम्भीर्यं प्रतिपादयति।

द्वैतवननिवासे बहवः मुनीन्द्राः धर्मजं प्राप्य बहुभिः उपाख्यानैः तत्प्राप्तं वनवास क्लेशादिकं दैवकृतमिति, अचिरेणैव एतत् क्लेशानां परिहारो भवेदिति च आश्वासयामासुः। नलोपाख्यानादि विषयाः तत्तत् प्रसङ्गे धर्मजं धार्मिकं चक्रुः।

तत्र एकदा द्रौपदी-धर्मजयोः सम्भाषणम् एवं समजनि। "धर्मो रक्षति रक्षितः" इति वाक्यं भवद्विषये असत्यमभूत्, इत्यादि वचनैः द्रौपदी भीमार्जुनयोः प्रस्तुतक्लेशस्थितिम् मनसि भावयित्वा यदा जगाद, तदा धर्मजः तद्वचनम् निपुणं खंडयामास। "अयि याज्ञसेनि! भवद्वचनं युक्तियुक्तं सदपि नास्तिकत्वं प्रबोदयति, मया कृतं यज्ञयागादि कर्म सर्वं फलं निरपेक्षमेव। फलाभिलाषीसन् कोपि मनुजः धर्मं यदाचरति सः धार्मिको न। धर्मव्यापारी, तादृशः निन्द्ययेव।

धर्म एव मनः कृष्णे स्वभावाच्चैव मे धृतम्।

धर्मवाणिज्यको हीनो जघन्यो धर्मवादिनाम्।। 31.5

इत्युक्त्वा सान्त्वयामास युधिष्ठिरः। मया यत् सहनम् आद्रियते तदेव धर्म, यज्ञ, वेदाः, श्रुतं च। "क्षमावान् सर्वं क्षन्तुमर्हति"। एतादृशी क्षमा भरतवम्श विनाशनात्मके अस्मिन् समये अयोग्यं सुयोधनं नाश्रयति। योग्यं मामेव निश्चीय आश्रयामास। इत्यादिकवचनैश्च स्वीयं धर्महृदयं निरूपयति।

पाशुपतास्त्रादिकं संसाद्य इन्द्रलोकपर्यटनं च कृत्वा विजयी विजयः पुनः धर्मजं मिलितुं संसिद्धहृदयो2भूत्। ततः पूर्वमेव इन्द्रप्रार्थितः लोमशः धर्मजं तीर्थयात्राचरणे प्ररोचयितुं काम्यकवनं प्रेषयति। ततः पूर्वमेव महात्मा बृहदश्वः वनवास क्लेशतप्तं धर्मजम् आश्वासितुं काम्यकवनं प्राप। अतिथिं तं मुनिं संसेव्य धर्मजः

अस्ति राजा मया कश्चित् अल्पभाग्यतरो भुवि।

भवता दृष्टपूर्वो वा श्रुतपूर्वोऽपि वा क्वचित्।। 52.50

धर्मार्थमेवं अनुभूयमानदुःखं मां पश्यसि किल। एवं विधं राजान्तरं कुत्र वा त्वया दृष्टः श्रुतो वा? " इति तं अपृच्छत्।

"अयि वत्स! इतोपि दुःखम् अनुभूय प्रसिद्धतरः नलः वर्तते किल। तद् चरित्र श्रवणनं त्वदाश्वासने अलं भवति। पवित्रतां च आपादयति। इति बृहदश्वः नलदमयन्त्योः मनोहरं परिणय वृत्तान्तं, कलिध्वम्सकम् उत्तरनैषधं च समग्रं धर्मजम् अकथयत्।

तदनन्तरं धर्मजान्तिकं प्राप्तः लोमशः अर्जुनविजयादिकं विवित्य तं तीर्थयात्राभिलाषिणं चकार। लोमशोपदेशेन यात्राप्रवृत्तः युधिष्ठिरः निजपरिवारं संकोचयति। मार्गशिरपूर्णिमानन्तरम् अक्षयपात्रासहितः मितपरिवारश्च स राजा तीर्थयात्रां कर्तुं आरेभे।

मार्गमध्ये अगस्त्य, सगर, मान्धात्रादि महात्मानां चरित्रं शृण्वन् क्रमेण, उत्तरदिशि तस्य यात्रा प्रवृत्ता। मैनाकादि पर्वत पङ्क्तीः अतीत्य कैलासाभिमुखी बभूव। लोमशतपःश्शक्त्या, अग्निहोत्रप्रभावेण, भीमपराक्रमेण च, द्रौपदी सहितानां पाण्डवानां यात्रा, घटोत्कच अनुसरणेन च ते गन्धमादनं प्राप्ताः।

ततः सौगन्धिका पुष्पप्राप्तिः, वायुनन्दनयोः परस्परसमागमः, रामायण कथा प्रसङ्गश्च, बादरायणेन अरण्यपर्वमध्ये विपुलम् उपवर्णितम्। तथैव "आगामि कुरुपाण्डवसम्ग्रामे अर्जुन कपिध्वजस्थित्वा पाण्डवविजयाऽपादको भवामि" इति हनुमद्वचनं भावि कथायां शुभसूचिकं अभूत्।

गन्धमादन स्थितिवेलायामेव इन्द्रानुगृहीत विजयः पाण्डवानामन्तिकं प्राप। स्वकृतं पाशुपतास्त्रसाधनं, आग्नेय, वारुणादि दिव्यास्त्रसम्पादनं च अग्रजाय निवेदयामास पार्थः। सोदरान्, द्रौपदीं च स एवं सन्तोषयामास। "तदस्त्रमहत्वं ज्ञातुं कुतुकी तत्प्रदर्शनं करोषि वा" इति अनुजं यदा धर्मजः प्राह, तथैवेति प्रवृत्तम् अर्जुनम् देवैः प्रेषितः नारदः अर्जुनं निवारयामास।

"अजातशत्रो! त्वं चैव द्रक्ष्यसे तानि संयुगे

योज्यमानानि पार्थेन द्विषताम् अवमर्धने।" 175.23

इति नारदोक्तं वचनं धर्मजं सानन्दं चकार। अर्जुन विजये एषाम् अस्त्राणां दर्शनं, धर्मजेन केवलं सुसाध्यं भवति। विजयानन्दतोषितो युधिष्ठिरः कर्णादिकृत त्रासं मनसि तत्याज।

धर्मजस्य बुद्धिवैभवं, पाण्डवसमूहस्वरूपे तस्य मुखस्थानीयत्वं **नहुषकथा**सन्दर्भे स्पष्टं प्रतिभाति। अर्जुनागनानन्तरं पाण्डवाः कुबेरप्रभावित प्रदेशेषु वर्षचतुष्टयं सुखम् ऊषुः। एवं वनवाससमये दशवर्षाः समाप्ताः। एकादशवर्षे तत्रतः प्रस्थाय ते द्वैतवनं प्राप्ताः। तत्रैकदा भीमः मृगयार्थं आगतः बलिष्ठम् अजगरम् समाप। चन्द्रवम्श चक्रवर्ती अगस्त्यशापग्रस्तः नहुषः एव सः।

नहुषो नाम राजर्षिः व्यक्तं ते श्रोत्रमागतः।

तवैव पूर्वः पूर्वे,मायोः वंशधरः सुतः।। 179.13

ततः तत्प्रार्थितः अगस्त्यः (कुम्भसम्भवः) तत् प्रश्नानां येन समाधानानि दीयन्ते सः तव शापविमोचको भवति इति अनुजग्राह। बन्दितं भीमं अन्विषन् धर्मजः नहुष समीपम् आगत्य सोदररक्षणार्थं तान् प्रश्नान् समादधति। नहुषप्रश्नघट्टः धर्मजस्य बुद्धिवैभवं, सोदरप्रेम च प्रकटयन्

"महत्वात् भारवत्वात् च महाभारतमुच्यते" इति सूक्तिं पुनरेकवारं सार्थकयति। "ब्राह्मणः को भवेद्रारजन्? वेद्यम् किम् च युधिष्ठिर"? इति प्रथम प्रश्नश्च

**सर्प उवाच**-

ब्राह्मणः को भवेद्राजन्वेद्यं किं च युधिष्ठिर।

ब्रवीह्यतिमतिं त्वां हि वाक्यैरनुमिमीमहे।।

**युधिष्ठिर उवाच** –

सत्यं दानं क्षमा शीलमानृशंस्यं दमो घृणा |

दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः || --इति गुणाः यत्र दृश्यन्ते सः ब्राह्मणः इति धर्मजस्य समाधानम्।

**घोषयात्रा**

द्वैतवनवासे पाण्डवान्तिकं प्राप्तः मार्कन्डेय महर्षिः बहुविधान् धर्मान्, मातापितृसेवनप्रबोधकं धर्मव्याधचरित्रादिकं, षण्मुखोत्पत्तिगाथादिकं च प्रसंगवशात् क्रमेण तान् कथयामास। अनन्तरं सपरिवारं तत्र प्राप्तः श्रीकृष्णः। सन्दर्भेऽस्मिन् सत्या-द्रौपदी सम्भाषणं बहुविध स्त्रीधर्मप्रबोधकं वेदव्यासेन निपुणं उपवर्णितम्।

अत्रान्तरे कर्णोद्बोधित कुटिलनीत्या कौरवाः घोषयात्रामिषेण पाण्डवानाम् अवहेलनार्थम् अवमानार्थं च द्वैतवनं प्रापुः।

घोषा द्वैतवने सर्वे त्वत्प्रतीक्षा नराधिप।

घोषयात्रापदेशेन गमिष्यामो न संशयः।। 138.19

आगमनसमनन्तरं कौरवाः पाण्डवसुहृद गन्धर्वराजेन चित्ररथेन, तन्नियुक्त गन्धर्वबलेन च विहतशक्तिकाः आसन्। सम्कल्पितं पाण्डव अपमानं कर्णकृतं कौरव अपमानम् आसीत्। चित्ररथबलेन विरथः महारथी कर्णः दुर्योधनं विमुत्य पलायनमन्त्रं संजजाप। चित्ररथः सभार्यं सुयोधनं जीवग्राहम् अग्रहीत्। कौरव स्त्रीभिः शिष्टैः योधैश्च प्रार्थितो धर्मजः कौरवरक्षणार्थं भीमार्रजुनौ नियुक्तवान्। (तत् सन्दर्भे धर्मजः राजर्षित्वमाश्रित्य, वनवासिभिः राजभिः करणीय विधानेन राजर्षियज्ञं कुर्वन् दीक्षितोऽवर्तत। "एतस्मात् कारणात् मया गन्तुं न शक्यते, तस्मात् भवन्तौ सोदर कौरवान् रक्षताम्।"

अस्मानभिगतांस्तात भयार्ताञ्छरणैषिणः।

कौरवान् विषमप्राप्तान् कथं ब्रूयास्त्वमीदृशम्।। 243.1

भवन्ति भेदा ज्ञातीनां कलहाश्च वृकोदर।

प्रसक्तानि च वैराणि कुलधर्मो न नश्यति।।

यदा तु कश्चिज्ज्ञातीनां बाह्यः पोथयते कुलम्।

न मर्षयन्ति तत् सन्तो बाह्येनाभिप्रधर्षणम्।।

परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम्।

परस्परविरोधे तु वयं पञ्च शतं तु ते।। 243.4

"शरणागतानाम् सुयोधनादीनां रक्षणम्, अस्मद् कुलीनानाम् अन्तः कलहः अस्मद्विषयिकः एव। भिन्नानां प्रवेशः अत्र मास्तु। इदानीं भवत्कृतेन कौरव रक्षणेन केवलं भवत्कृतशपधानि साध्यानि भवन्ति।" इति धर्मजोक्त विषयं तस्य राजनीतिचातुर्यं, कर्तव्यप्रबोधनं च निपुणं निरूपयति। "कुटिलं, कुटिलसम्प्रेरितं सुयोधनं बध्नातु भवान्" इति इन्द्र प्रेषितो2हम् इत्युक्ते गन्धर्वराजे अस्माकं धर्मजाज्ञा इयम्, वयमेव अत्र जेतारः इति अर्जुनप्रतिवचनं धर्मराजम् इन्द्राधिकम् करोति। धर्मजकृतं दुर्योधनसान्त्वनं तन्मानधनस्य मानापहारकं व्यसेन आयोजितम्। एवम् अवमानार्थं प्रारब्धं धर्मजनीति प्रशंसकम् आसीत्। असमर्थैः शत्रुभिः प्रकल्पिता अपकृतिः योग्यानाम् उपकर्त्री एव।

एवं धर्मराजस्य औचित्यपालनं कौरव वर्गसंरक्षणं च, घोषयात्रा सन्दर्भे, आगामि सैन्धवपराभव कथायां च प्रशंसार्हं चकास्ति।

पाण्डवसमूहस्य पञ्चात्मकसोदरबृन्दस्य स्वास्थं, बलवर्थनं धर्मजेन समम् आकांक्षितं प्रतिनिमिषं, धर्मजरक्षिताः वयम् इति सोदर चतुष्टयं जानन्त्येव सदा।

सूर्येन्द्रसमागम निर्गमनानन्तरं कवचकुण्डलप्रदान वृत्तान्तम् कर्णात् पाण्डवरक्षणं, अर्जुनविजयं च निर्थार्य धर्मजः अतीव सञ्जहर्ष। कौरवाश्च खिन्नमनस्काः आसन्। कर्णस्य दातृत्वव्यसनं कौरव अपजय सम्पादने प्रधानकारणम् आसीदिति देवाः सर्वे सानन्दा अभूवन्।

श्रुत्वा कर्णे मुषितं धार्तराष्ट्रा

दीनाः सर्वे भग्नदर्पा इवासन्।

तां चावस्थां गमितं सूतपुत्रं

श्रुत्वा पार्था जहृपुः काननस्थाः।। 310. 40

**यक्षप्रश्नाः**

पाण्डवाः द्वादश समान् समाप्य आसन्नाज्ञातवासाः बभूवुः। तस्मिन् सन्दर्भे पाण्डवरक्षकं धर्मसूतिम्(धर्मात्मजम्) परीक्षितुम् अज्ञातवासविजयमार्गं च उपदेष्टुं धर्म एव भारतकथायां व्यास एव एवं प्रविष्टवान्। कस्यचन ब्राह्मणस्य अरणि प्रदाने प्रार्थितो धर्मजः अरणिलग्नशृंगं मृगं  अन्वेष्टुं नकुलसहदेवौ भीमार्जुनौ च क्रमेण प्रेषयति। जलपान प्रवृत्तान् तान् बकरूपो यक्षः क्रमेण अतिक्रान्त स्ववचनान् विगतजीवान् चकार।

तान् अन्विषन् आगतम् धर्मजं सयक्षः निजप्रश्नानां समाधानं ब्रूहि इति धर्मजम् आदिदेश। विनयी धर्मजः प्रथमं, बकम् अतिशक्तिं मानवातीतं मत्वा समाधान प्रदाने सन्नद्धोऽभूत्। यक्षप्रश्नान्ते च तं शक्तिं यक्ष शक्ति अतीतम् विज्ञाय तस्य निजरूपं प्रदर्शयेति प्रार्थितवान् धर्मजः। पुरोगतस्य व्यक्तेः रूपनिर्धारणे सूक्ष्मेक्षिणिका निपुणम् अत्र धर्मजपात्रे व्यासेन प्रदर्शिता।

यक्ष उवाच ।

किं स्विदादित्यमुन्नयति के च तस्याभितश्चराः ।

कश्चैनमस्तं नयति कस्मिंश्च प्रतितिष्ठति ॥ ४५॥

युधिष्ठिर उवाच ।

ब्रह्मादित्यमुन्नयति देवास्तस्याभितश्चराः ।

धर्मश्चास्तं नयति च सत्ये च प्रतितिष्ठति ॥ ४६॥

धर्मज समाधानानाम् अनन्तरं प्रीतो यक्षः भवत्सोदरेषु अन्यतमम् सञ्जीवयामि, तवेष्टं सोदरं ब्रूहि, इति पृष्टो धर्मजः, नकुलसञ्जीवनं वव्रे। तस्य धार्मिकसमाधानेन पुलकितो यक्षः तदाश्रित धर्मं लोके प्रकाशयितुम् एवं प्रप्रच्छ। "सन्निहिते सङ्ग्रामे समर्धौ भीमार्जुनौ विहाय नकुलसञ्जीवनं कथं त्वया आकांक्षितम् " इति पृष्टः धर्मजः, "कुन्तीपुत्रेषु अहं ज्येष्ठः जीवामि, मम द्वितीय मातुः पुत्रद्वये ज्यायान्(ज्येष्ठः) नकुलः मया प्रार्थितव्यः।

यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः ।

मातृभ्यां सममिच्छामि नकुलो यक्ष जीवतु ॥

युक्तियुक्तं धार्मिकं तद्वचनं श्रुत्वा पुलकितो यक्षः सोदरचतुष्ठयं सञ्जीवयामास। तदुज्जीवनं धर्मजम् आश्चर्यमग्नमकरोत्। "स्वामिन्! भवन्तं यक्षसामान्यं नाहं मन्ये, कृपया नैजं स्वरूपं मह्यं निवेदयतु" इति

धर्मजप्रार्थितः यक्षः निजधर्मराजरूपेण आविर्बभूव। अज्ञातवास सन्नद्धं भवन्तं, तव मानसिक दार्ढ्यं च परीक्षितुम् अहम् एवम् आगतवान्।

"वरं वृणु" इति यमप्रेरितो धर्मसूतिः "ब्राह्मणस्य अरणि प्रदानार्थं वयमागताः, तत्प्रदाने अस्मान् समर्थान् कुरु" इति वरं वृणीते। शमनः स्मितं कृत्वा तत्सर्व "स्वेनैव कल्पित"मिति प्रकटय्य अनुजग्राह। वरान्तरं दातुमुत्सुकं जनकम् "अज्ञातवासवेलायां द्रौपदी षट्कं पाण्डवं लौकिक दृष्टेः गोपय" इति वरम् अवृणोत्। विराटदेशे भवताम् अज्ञातवासः विजयीभवति। भवदिच्छानुरूपं वेषकल्पनं च भवति इत्युक्त्वा यमः "तृप्तिर्मे न भवति, पुनरप्येकं वरं वृणु" इत्यादिष्टवान्। तत् समाधानतया "मे मनः धर्मात् मा प्रचलतु" इति वरम् अर्थितवान्। 'तथास्तु' इति वदन् सः धर्मजमनुजग्राह। एवं वरप्रदानानन्तरं यमः अन्तर्दधौ। अरणिमन्थनकाष्टं प्रदाय ब्राह्मणानुग्रहं च प्रापुः पाण्डवाः। एवं च सन्दर्भेऽस्मिन् दैव ब्राह्मणशक्तिः पाण्डवान् अनुसरतीति व्यासेन उपदिष्टं प्रतिभाति। आगामि विराटपर्वप्रारम्भः एतत् प्रभावितः एवेति विज्ञानां गोचरी भवतु।

**उपयुक्तग्रन्थसूची** –


1. श्रीमन्महाभारतम् - कृष्णाचार्यः- टि आर् व्यासाचार्यः – निर्णयसागर् प्रेस्, बोम्बे – 1906
2. व्यासमहाभारतम् – तिप्पाभट्ल रामकृष्णमूर्ति, श्रीनिवासुलु सूरम् – विजयवाड – 2010
3. महाभारतम्- गीताप्रेस् – रामनारायणदत्त शास्त्री, पाणडे हिन्दी अनुवादः
4. महाभारतम् – शास्त्री पि पि यस् – वाविल्ल रामस्वामि शास्त्रुलु अंड सन्स् -1931


**************


**Address and Email** –

**Author** : - Dr M B S S Narayana

Assistant Professor in Sanskrit

Sri Satya Sai Institute of Higher Learning

PrasanthiNilayam, A.P – 515134